# सुन्दरकाण्ड सप्तपञ्चाशः सर्गः (५७) - उत्तरतीरप्राप्तिः

सचन्द्र कुमुदं रम्यं सार्क कारण्डवं शुभम् ।
तिष्य श्रवण कादम्ब मभ्र शैवाल शाद्वलम् ॥ १ ॥

पुनर्वसु महामीनं लोहिताङ्ग महाग्रहम् ।
ऐरावत महाद्वीपं स्वाती हंस विलोलितम् ॥ २ ॥

वात सङ्घात जातोर्मि चन्द्रांशु शिशिराम्बुमत् ।
भुजङ्ग यक्ष गन्धर्व प्रबुद्ध कमलोत्पलम् ॥ ३ ॥

हनुमान् मारुत गतिर् महानौरिव सागरम् ।
अपार मपरिश्रान्तः पुप्लुवे गगनार्णवम् ॥ ४ ॥

ग्रसमान इवाकाशं ताराधिप मिवोल्लिखन् ।
हरन्नि व सनक्षत्रं गगनं सार्क मण्डलम् ॥ ५ ॥

मारुतस् यात्मजः श्रीमान् कपिर् व्योमचरो महान् ।
हनुमान् मेघ जालानि विकर्षन्निव गच्छति ॥ ६ ॥

पाण्डरारुण वर्णानि नील माञ्जिष्ठकानि च ।
हरितारुण वर्णानि महाभ्राणि चकाशिरे ॥ ७ ॥

प्रविशन् नभ्र जालानि निष्क्रामंश्च पुनः पुनः ।
प्रच्छन्नश्च प्रकाशश्च चन्द्रमा इव लक्ष्यते ॥ ८ ॥

विविधाभ्र घनापन्न गोचरो धवलाम्बरः ।
दृश्यादृश्य तनुर् वीरस् तदा चन्द्रायतेम्बरे ॥ ९ ॥

ताक्ष्यायमाणो गगने बभासे वायु नन्दनः ।
दारयन् मेघ वृन्दानि निष्पतंश्च पुनः पुनः ॥ १० ॥

नदन् नादेन महता मेघस्वन महास्वनः ।
प्रवरान् राक्षसान् हत्वा नाम विश्राव्य चात्मनः ॥ ११ ॥

आकुलां नगरीं कृत्वा व्यथयित्वा च रावणम् ।
अर्दयित्वा बलं घोरं वैदेही मभिवाद्य च ॥ १२ ॥

आजगाम महातेजाः पुनर् मध्येन सागरम् ।
पर्वतेन्द्रं सुनाभं च समुप स्पृश्य वीर्यवान् ॥ १३ ॥

ज्यामुक्त इव नाराचो महावेगोऽभ्युपागतः ।
स किञ्चिदनु सम्प्राप्तः समालोक्य महागिरिम् ॥ १४ ॥

महेन्द्रं मेघ सङ्काशं ननाद हरि पुङ्गवः ।
स पूरयामास कपिर् दिशो दश समन्ततः ॥ १५ ॥

नदन् नादेन महता मेघस्वन महास्वनः ।
स तं देश मनुप्राप्तः सुहृद् दर्शन लालसः ॥ १६ ॥

ननाद हरिशार्दूलो लाङ्गूलं चाप्यकम्पयत् ।
तस्य नानद्य मानस्य सुपर्ण चरिते पथि ॥ १७ ॥

फलतीवास्य घोषेण गगनं सार्क मण्डलम् ।
ये तु तत्रोत्तरे तीरे समुद्रस्य महाबलाः ॥ १८ ॥

पूर्वं संविष्ठिताः शूरा वायुपुत्र दिदृक्षवः ।
महतो वायुनुन्नस्य तोयदस्येव गर्जितम् ॥ १९ ॥

शुश्रुवुस्ते तदा घोष मूरुवेगं हनूमतः ।
ते दीन वदनाः सर्वे शुश्रुवुः काननौकसः ॥ २० ॥

वानरेन्द्रस्य निर्घोषं पर्जन्य निनदोपमम् ।
निशम्य नदतो नादं वानरास्ते समन्ततः ॥ २१ ॥

बभूवुरुत्सुकाः सर्वे सुहृद् दर्शन काङ्क्षिणः ।
जाम्बवांन् स हरिश्रेष्ठः प्रीति संहृष्ट मानसः ॥ २२ ॥

उपामन्त्र्य हरीन् सर्वा निदं वचन मब्रवीत् ।
सर्वथा कृत कार्योऽसौ हनूमान् नात्र संशयः ॥ २३ ॥

न ह्यस्या कृत कार्यस्य नाद एवं विधो भवेत् ।
तस्य बाहूरु वेगं च निनादं च महात्मनः ॥ २४ ॥

निशम्य हरयो हृष्टाः समुत्पेतुस् ततस् ततः ।
ते नगाग्रान् नगाग्राणि शिखराच् छिखराणि च ॥ २५ ॥

प्रहृष्टाः समपद्यन्त हनूमन्तं दिदृक्षवः ।
ते प्रीताः पादपाग्रेषु गृह्य शाखाः सुविष्ठिताः ॥ २६ ॥

वासांसीव प्रशाखाश्च समा विध्यन्त वानराः ।
गिरि गह्वर संलीनो यथा गर्जति मारुतः ॥ २७ ॥

एवं जगर्ज बलवान् हनूमान् मारुतात्मजः ।
तमभ्र घन सङ्काश मापतन्तं महाकपिम् ॥ २८ ॥

दृष्ट्वा ते वानराः सर्वे तस्थुः प्राञ्जलयस् तदा ।
ततस्तु वेगवांस् तस्य गिरेर् गिरिनिभः कपिः ॥ २९ ॥

निपपात महेन्द्रस्य शिखरे पादपाकुले ।
हर्षेणापूर्य माणोऽसौ रम्ये पर्वत निर्झरे ॥ ३० ॥

छिन्नपक्ष इवाकाशात् पपात धरणीधरः ।
ततस्ते प्रीतमनसः सर्वे वानर पुङ्गवाः ॥ ३१ ॥

हनुमन्तं महात्मानं परिवार्योप तस्थिरे ।
परिवार्य च ते सर्वे परां प्रीति मुपागताः ॥ ३२ ॥

प्रहृष्ट वदनाः सर्वे तमरोग मुपागतम् ।
उपायनानि चादाय मूलानि च फलानि च ॥ ३३ ॥

प्रत्यर्चयन् हरि श्रेष्ठं हरयो मारुतात्मजम् ।
हनूमांस्तु गुरून् वृद्धान् जाम्बवत् प्रमुखांस् तदा ॥ ३४ ॥

कुमार मङ्गदं चैव सोऽवन्दत महाकपिः ।
स ताभ्यां पूजितः पूज्यः कपिभिश्च प्रसादितः ॥ ३५ ॥

दृष्टा सीतेति विक्रान्तः सङ्क्षेपेण न्यवेदयत् ।
निषसाद च हस्तेन गृहीत्वा वालिनः सुतम् ॥ ३६ ॥

रमणीये वनोद्देशे महेन्द्रस्य गिरेस् तदा ।
हनुमा नब्रवीद् दृष्टस् तदा तान् वानरर्षभान् ॥ ३७ ॥

अशोक वनिका संस्था दृष्टा सा जनकात्मजा ।
रक्ष्यमाणा सुघोराभी राक्षसीभि रनिन्दिता ॥ ३८ ॥

एकवेणीधरा बाला राम दर्शन लालसा ।
उपवास परिश्रान्ता जटिला मलिना कृशा ॥ ३९ ॥

ततो दृष्टेति वचनं महार्थ ममृतोपमम् ।
निशम्य मारुतेः सर्वे मुदिता वानरा भवन् ॥ ४० ॥

क्ष्वेलन्त्यन्ये नदन्त्यन्ये गर्जन्त्यन्ये महाबलाः ।
चक्रुः किलिकिला मन्ये प्रति गर्जन्ति चापरे ॥ ४१ ॥

केचिदुच्छ्रित लाङ्गूलाः प्रहृष्टाः कपिकुञ्जराः ।
अञ्चितायत दीर्घाणि लाङ्गूलानि प्रविव्यधुः ॥ ४२ ॥

अपरे च हनूमन्तं वानरा वारणोपमम् ।
आप्लुत्य गिरिशृङ्गेभ्यः संस्पृशन्ति स्म हर्षिताः ॥ ४३ ॥

उक्तवाक्यं हनूमन्त मङ्गदस्त मथाब्रवीत् ।
सर्वेषां हरि वीराणां मध्ये वचन मुत्तमम् ॥ ४४ ॥

सत्त्वे वीर्ये न ते कश्चित् समो वानर विद्यते ।
यदवप्लुत्य विस्तीर्णं सागरं पुनरागतः ॥ ४५ ॥

अहो स्वामिनि ते भक्ति रहो वीर्यमहो धृतिः ।
दिष्ट्या दृष्टा त्वया देवी रामपत्नी यशस्विनी ॥ ४६ ॥

दिष्ट्या त्यक्ष्यति काकुत्स्थः शोकं सीता वियोगजम् ।
ततोऽङ्गदं हनूमन्तं जाम्बवन्तं च वानराः ॥ ४७ ॥

परिवार्य प्रमुदिता भेजिरे विपुलाः शिलाः ।
श्रोतुकामाः समुद्रस्य लङ्घनं वानरोत्तमाः ॥ ४८ ॥

दर्शनं चापि लङ्कायाः सीताया रावणस्य च ।
तस्थुः प्राञ्जलयः सर्वे हनुमद् वदनोन् मुखाः ॥ ४९ ॥

तस्थौ तत्राङ्गदः श्रीमान् वानरैर् बहुभिर् वृतः ।
उपास्यमानो विबुधैर्दिवि देवपतिर् यथा ॥ ५० ॥

हनूमता कीर्तिमता यशस्विना
तथाङ्गदे नाङ्गद बद्ध बाहुना ।
मुदा तदाध्यासित मुन्नतं महन्
महीधराग्रं ज्वलितं श्रियाऽभवत् ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥